M-94

रामरामसैव
श्रुतिबोधईनीचंदकाहै

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

श्रु०बो०
१

ॐ श्रीगणेशाय नमः ॥ शुभजननसमर्थाऽऽवादिनाथस्य पादावसुरसुरमतुष्टैर्भूहरिवंद्यौ हि नत्वा ललितपदसुम्यां श्रु
तबोधस्य टीकां मुनिरहमिह कुर्वे हंसराजो विचित्रां १ सुगुरुवचनदीपे दर्शिते तत्त्वरूपं मम हृदयगुहाते नु स्फुरत्यत
देव मश्रामहमाधिधास्ये बालबोधिप्रसंगे निजपठननिमित्तं बालबोधाय चैव २ अथ रंतु कविकालिदासः तत् श्रुतबोधनाम
धेयं अविस्तरं विस्तारातरिक्तं कथयिष्यामि तत् किं येन श्रुतबोधेन श्रुतमात्रेण श्रवणीकृतमात्रेण अध्ययनमात्रेण वा

छंदसां लक्षणं येन श्रुतमात्रेण बुध्यते तमहं कथयिष्यामि श्रुतबोधमविस्तरं १

छंदसां स्फुटप्रसिद्धानां लक्षणं चिह्नं बुध्यते ज्ञायते अस्य छंदसो लक्षणमिदमेवेति ज्ञायते १ न विस्तरं छंदसां यत्र
तदविस्तरं इत्यनेन पदेन ज्ञापितं जपस्तुरवबोधार्थं मया कृतं विस्तारं पठितुमशक्यत्वात् श्रुतानि शास्त्राणि छं
दांसि बोधयतीति श्रुतबोधं इत्यनेन पदेन ज्ञापितं प्रसिद्धानि छंदांसि ज्ञायंते संप्रतं गुरुलक्षणमाह १

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

व्याख्या इदं द्विविधमक्षरं गुरुसंज्ञकं विज्ञेयं ज्ञातव्यं संयुक्ताद्यं संयोगीभूतस्याद्यमादिभवं पुनः कीदृशं वि
सर्गसंमिश्रं विसर्गेण संमिश्रं विसर्गोपात्तमित्यर्थः पादांतस्थमक्षरं विकल्पेन [illegible] लघु विज्ञेयं पादांते गुरोः
लघुः स्यात् क्वचिदपि स्थाने लघोरपि गुरुः स्यात् तथा चोक्तं ग्रंथांतरे वा पदांते त्वसौ ग्वक्रो ज्ञेयो न्यो मात्रिको ल

संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रं विज्ञेयमक्षरं गुरु पादांतस्थं विकल्पेन २ [illegible]
यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेपि अष्टादश द्वितीये चतुर्थके पंचदश

नुः २ अथार्यालक्षणमाह सा आर्या ज्ञातव्या सा का यस्याः प्रथमे आद्ये चरणे द्वादश मात्राः स्युः तृ
तीयसंख्यके चरणे तथा द्वादश मात्रा भवंति द्वितीये पादे अष्टादश मात्रा भवंति चतुर्थके पादे पं
५ चदश मात्रा भवंति ३ इति छंदः ॥

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

गी० २

व्याख्या हे अमृतवाणि छंदोविदः तां गीतीति संज्ञकां तदानीं तस्मिन्काले भाषंते ब्रुवंति हे हंसगते यत्र
आर्य्यायाः पूर्वार्द्धसमं द्वितीयमपि उत्तरार्द्धमपि भवति आर्य्यायाः पूर्वार्द्धेन द्वादशाष्टादशमात्रिकेन स
मं तुल्यं प्रथमे पादे १२ द्वादश मात्राः द्वितीयेऽष्टादश १८ तृतीये द्वादश मात्राः चतुर्थेऽष्टादश

आर्यापूर्वार्द्धसमं द्वितीयमपि भवति यत्र हंसगते छंदोविदस्तदा
नीं गीतिं ताममृतवाणि भाषंते ४ ॥

मात्राः १८ इति आर्यापूर्वार्द्धसमं उत्तरचरणद्वयं जाते अमृतवाणी यस्याः सा अमृतवाणी
तस्याः संबोधने हे अमृत० ॥ छंदांसि वदंति जानंतीति छंदोविदः छंदशास्त्रज्ञातार इत्यर्थः हंसस्य
गतिरिव गतिर्यस्याः सा हंसगतिः [illegible] तस्याः संबोधने हे हंसगमने इत्यर्थः ४ ॥ ७ ॥ ॥

२

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

व्याख्या हे कामिनी महाकवयः तामुपगीतीं प्रकाशयंते उपगीतिसंज्ञकां प्रकटीकुर्वंते इत्यर्थः तां कां कृत्वा हे
चेत् यदि आर्योत्तरार्द्धतुल्यं प्रथमार्द्धमपि प्रयुक्तं प्रयोगीकृतं भवति आर्याया उत्तरार्द्धेन द्वादश पंचदश
मात्रकेन तुल्यासमानं प्रथमचरणद्वयं भवति २ चतुर्थके चरणे पंचदश मात्रा भवंति व्याख्याते तृती
ये चरणे द्वादश मात्रा भवंति कामो विद्यते यस्याः सा कामिनी तस्याः संबोधने हे कामिनी महातस्थते

आर्योत्तरार्द्धतुल्यं प्रथमार्द्धमपि प्रयुक्तं चेत् कामिनि तामुपगीतिं प्रकाशयं
ते महाकवयः ५ आदिचतुर्थपंचमकं चेत् यत्र गुरु स्यात्साक्षरपंक्तिः ६॥

कवयः तथान्योक्तमुपगीतिलक्षणं ग्रंथांतरे आर्याद्वितीयकेर्द्धे यद्गदितं लक्षणं तत्स्यात् अक्षरपंक्तिमाहु
व्याख्या साक्षरपंक्तिः संज्ञका ज्ञेया अक्षरशब्दः पादपूरणार्थमेव वदतः पंक्तिरिति ज्ञेया सा का यत्र चेत् यदि आद्य प्र
थमे अक्षरं गुरु स्यात् चतुर्थं गुरु स्यात् पंचमकमक्षरं गुरु स्यात् शेषमिति संबंधः तथा चोक्तं भौभगिति पंक्तिः ६

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

श्रु॰बो॰
३

यत्राक्षरं जातौ शशिवदनालक्षणमाह हे घनकुचयुगे यस्यै सो शशिवदनानाम छंदो भवेत यस्यै के स्याद
यत्र चतुष्कं अक्षरं चतुर्ष्व्यक्षरं गुरुः लघु स्यात् यत्र द्वौ वर्णौ पंचम षष्ठौ गुरू दीर्घौ भवतः अस्याः संविति स
बंधः घनं कठिनं कुचयुगं स्तनद्वयं यस्याः सा घनकुचयुगा तत् स्याः संबोधनं हे घनकुचयुगे इति
केदारमिश्रेणाप्युक्तं शशिवदनान्यो ७ सप्ताक्षरं जातौ मदलेखा लक्षणमाह मारव्यो हे मगनेत्र सारंगनयने

अगुरुश्चतुष्कं भवति गुरुः यो घनकुचयुगे शशिवदनासौ ७ तुर्ये पंचम
के चेयत्र स्याल्लघुवाले विद्धि दृग् मृगनेत्रे प्रोक्ता सा मदलेखा ८ ॥ ◌

विद्धि दुःपंडितैः सा मदलेखा प्रोक्ता सा का उत्साह हे बाले हे नवयौवनधरे चेत् यदि तुर्ये चतुर्थे लघु
स्यात् पंचमं लघु स्यात् इति मृगाक्ष नेत्रे उ वन्नेनेयस्याः सा मृगनेत्रा तस्याः संबोधनं हे मृगनेत्रे इति ।
तथा चोक्तं वृत्तरत्नाकरे म्सौ गः स्यान्मदलेखा SSS IISS oSSS IISS oSSS IISS oSSS IISS o ॥ ८ ॥ ◌

३

अथा...तरजातौ लक्षणमाह व्याख्या एतत्पद्यस्य पद्यसंज्ञकस्य लक्षणं निष्पन्नं किं एतत् इत्याह सर्वत्र च
तुर्षु चरणेषु पंचमम् अक्षरं लघु स्यात् द्विचतुर्थयोः पादयोः सप्तमम् अक्षरं लघु स्यात् द्वि चतुर्थ्यादयोः द्विती
य चतुर्थयोः सप्तमं ह्रस्वं स्यात् अन्ययोः प्रथमतृतीयपादयोः सप्तमं दीर्घं स्यात् आदिपादे रसौ गलौ भवतः
ऽ।ऽ।।ऽऽ। द्वितीयपादे रसौ गलौ ऽ।ऽ।।ऽ।ऽ। तृतीयपादे जसौ गौ भवतः चतुर्थपादे रौ लगौ भवतः ९

पंचमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणं ९
आदिगतं तुर्यगतं पंचमकं चांतगतं स्याद्गुरु चेत्तत्कथितं मानवकक्रीडमिदं १०॥

वकक्रीडलक्षणमाह व्याख्या तदिदं मानवकक्रीड छंदः कथितं चेत्पदि आदिगतं गे गुरुः स्यात् तुर्यगतं च
तुर्यस्थानस्थितं गुरु स्यात् पंचमकं पंचमसंख्यापूरकं गुरु स्यात् च पुनः तिपादपूरणे अंत्यगतं अंत्यस्थितं
अष्टमं गुरु स्यात् १० उक्तं वृत्तरत्नाकरे मानवकं भात् लगाः ऽ।।ऽऽ।।ऽ०ऽ।।ऽऽ।ऽ०ऽ।।ऽऽ।।ऽ०॥

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

नगस्वरूपिण्या लक्षणमाह व्याख्या. तदा तस्मिन्काले बुधाः पंडिताः तां नगस्वरूपिणीं निवेदयंति क
पयंति तदा कदा यदा द्वितुर्यषष्ठं दीर्घं प्रयोजितं द्वितीयं गुरुः स्यात् तुर्यं गुरुः स्यात् षष्ठं गुरुः स्यात्.
अष्टमं च गुरुः स्यात् प्रयोजितं भवति नगस्वरूपिण्या नामेतत् वृत्तरत्नाकरे अग्रमाह प्रमाणिका
जरौ लगौ ।ऽ।ऽ।ऽ।ऽ० ।ऽ।ऽ।ऽ।ऽ० ।ऽ।ऽ।ऽ।ऽ० ।ऽ।ऽ।ऽ।ऽ० ॥ विद्युन्माला लक्षणमाह ११ व्याख्या ८

द्वितुर्यषष्ठमष्टमं गुरुः प्रयोजितं पदा तदा निवेदयंति तां बुधा नगस्वरूपि
णीं सर्वे वर्णा दीर्घा यस्या विश्रामो स्याद्वेदैर्वेदैः विद्वद्वृंदैर्वीणावाणि व्याख्या
ता सा विद्युन्माला १२

वीणावाणि विद्वद्वृंदैः पंडितसमूहैः सा विद्युन्माला व्याख्याता सा का उत्पाद यस्याः सर्वे वर्णाः शे
वर्णा दीर्घा गुरवो भवंति अपवेदैर्वेदैश्चतुर्भिश्चतुर्भिर्विश्रामः विरामः स्यात् भवेत् वीणाया
वाणीयस्याः सा वीणावाणी तस्याः संबोधने हे वीणावाणि विद्वद्वृंदानि विद्वद्वानितैः विद्वद्वृंदैः
उक्तो च वृत्तरत्नाकरे मो मो गो गो विद्युन्माला ऽऽऽऽ ऽऽऽऽ० ऽऽऽऽऽऽऽऽ ०ऽऽऽऽऽऽऽऽ ०ऽऽऽऽऽऽऽऽ० १२

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

दशाक्षरजातौ चंपकमालालक्षणमाह व्याख्या हे तन्वि हे तन्वंगि सा चंपकमाला कथनीया वाच्या
लाकारैरुक्तमाह यत्र आद्यं चतुर्थं गुरु स्यात् आद्यं गुरु स्यात् अपि चतुर्थं गुरु स्यात् इत्यर्थः पंच
मं गुरु स्यात् षष्ठं गुरु स्यात् इत्यर्थः चेति पादपूरणे अंत्यं अंते भवम् अष्टमं दशमं गुरु स्यादित्यर्थः
उपांत्यं अंत्यस्य उपसमीपं उपांत्यं नवमं गुरु स्यादित्यर्थः यत्र रुद्रिपवाणैर्विरामः स्यात् पंचभिः

तन्वि गुरु स्यादाद्यचतुर्थं पंचमषष्ठं चांत्यमुपांत्यं रुद्र
पवाणैर्यत्र विरामः सा कथनीया चंपकमाला १३ ॥

पतिः स्यादित्यर्थः आद्यं चतुर्थं च आद्यचतुर्थं पंचमं च षष्ठं च पंचमषष्ठं एकत्वे द्विगुं द्वौ द्व
त्येनेन षष्ठेण नपुंसकलिंगे स्थापिते रुद्रयाणि च वाणाश्च रुद्रयवाणास्तैः तथोचोक्तं चंपक
माला चेद्रुमसागु ऽ।।ऽऽऽ।।ऽऽ०ऽ।।ऽऽऽ।।ऽऽ०ऽ।।ऽऽऽ।।ऽऽ०।।१३

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

नवाक्षरजातौ मणिवंधलक्षणमाह व्याख्या हे प्रेमनिधे छंदसि दत्तायेककवयः छंदस्याहे
नियणायेककवयोवर्त्तते तेककवयः तत छंदः मणिवंधं मणिवंधसंज्ञिकं ब्रुवते व्याचक्षते तत
त्किमित्याह यत्रयस्मिन छंदसि चंपकमालाग्रमाक्षर रहिता भवेत चंपकमालादशाक्ष

चंपकमालायत्रभवेदंत्यविहीना प्रेमनिधे छंदसि
दत्तायेककवयस्तन्मणिवंधं तेब्रुवते १५ ॥

रा वर्त्तते इदं नवाक्षरं मणिवंधं छंदः चंपकमालालक्षणयुक्तं यानि लक्षणानि चंपकमाला
यां उक्तानि तान्येवास्मिन्भवंति प्रेमनिधिरिव निधिः तस्याः संबोधनं हे प्रेमनिधे अग्रसहेत्र
स्य निधिरिव निधिः सा तस्याः संबोधने हे प्रेमनिधे अंत्येनाक्षरेण दशमेन विहीना रहिता
अंत्यविहीना ऽ।।ऽऽऽ।।ऽ०ऽ।।ऽऽऽ।।ऽ०ऽ।।ऽऽऽ।।ऽ०ऽ।।ऽऽऽ।।ऽ०।। १५ ॥

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

व्याख्या हे तन्वि प्रवरकवयस्तां मंदाक्रांतां संगिरंते कथयंतीति तां कामित्याशंक्याह हे सुतनु पंच चत्वारः
प्राक् यस्यां यामुखो भवति हे मुग्धे पदे द्वादशैकादशौ वर्णौ गुरू भवतः दशमः गुरुः स्यात् एकादशः गु
रुः स्यात् उत्तरार्धे हे कुमुदामोदिनि तदनु ताभ्यां परो द्वादशो नो त्रयोदशचतुर्दशौ वर्णौ गुरू भवतः
तदनंतरं वीक्ष्यप्रकारवत् श्रोत्यो प्रांते भवो द्वौ वर्णौ गुरू भवतः षोडशो गुरुः स्यात् सप्तदशमो गुरुः स्या

चत्वारः प्राक् सुतनु गुरुर्वै द्वादशैकादशौ च मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशं
त्यो तदनु तुर्यो त्यो युगरसहयैर्यच्छकांते विरामो मंदाक्रांतां प्रवरकवयस्तन्वि तां संगिरंते

दे त्वर्धे हे कांते पंच युगरसहयैः विश्रामोस्यात् चतुःषट्सप्तभिः विरतिर्भवतीति व्याख्यानं इतिशो
भनातन्नः पस्याः हे सुतनु तस्याः संबोधने हे सुतनु दशमश्च एकादशश्च द्वादशैकादशौ कुमुदवत् शोआमो
दः सुगंधः परिमलो विद्यते यस्याः सा कुमुदामोदिनी तस्याः संबोधने हे कुमुदामोदिनि द्वादशः स्यत्तो
द्वादशोंत्यो युगानि चत्वारः रसाः षट् हयाः सप्त तैः प्रवराश्च ते कवयश्च प्रवरकवयः उक्तं च मंदाक्रांता ॥

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

हंसालक्षणमाह व्याख्या हे कमलवदने साश्रसिद्धा छंदः हंसी ज्ञेया कथंभूता ध्रुवं निश्चितं वि
द्वद्भिः पंडितैः अभिहिता कथिता सा का हंसालंकारे यदि मंदाक्रांतायां अंत्यपतिरहिता भवति अं
त्याश्चते स्थिता या पतिः तया अंत्यपत्या रहिता वर्जिता मेताक्रांतायास्तिस्रो पतयो भवंति युगरस

मंदाक्रांतांत्यपतिरहिता सालंकारे भवति यदि सा त
द्विद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने १६ ॥

हयलक्षणपाः पतितया रहिताश्चतो हेतोर्दशाक्षरं हंसी छंदः स्थिता स्थि मंदाक्रांतायां यानि
लक्षणान्युक्तानि तानि तान्येवास्मिन् हंसी छंदसि भवंति कमलमिव वदनमुखं यस्याः सा कमल
वदना तस्याः संबोधने हे सालंकारे आभरणयुक्ते उत्तरार्धः १६ ॥ ७ ७ ७

एकादशाक्षरजातौ शालिनीमालक्षणमाह व्याख्या हे तन्वि छंदोदर्शीयाः छंदोविदः तीति छंदोदर्शी
याः छंदः शास्त्रज्ञातारः बुधाः तां शालिनीं नामधेयं भाषंते ब्रुवंते नं कोहे कंबुग्रीवे यत्र ह्रस्वो वर्णो
षष्ठः जायते तद्वत् पूर्वोक्तप्रकारवत् एव निश्चितं अष्टमोन्योनवमो ह्रस्वो जायते यत्र वेदैः अश्व

ह्रस्वो वर्णो जायते यत्र यत्र षष्ठः कंबुग्रीवे तद्वदेवाष्टमान्त्यः
विश्रामः स्यात्तन्वि वेदैस्तुरंगैस्तां भाषंते शालिनीं छंदोदर्शीयाः १७॥

वर्णैः तुरंगैः सप्तभिश्च विश्रामो विरामः स्यात् इति कंबोः शंखस्य ग्रीवावत् ग्रीवा यस्याः सा कंबुग्री
वा तस्याः संबोधने हे कंबुग्रीवे त्रिवला स्यात् कंबुग्रीवा अग्रमरेख्यक्रमेवं केदारयदेनापि शालिनीलक्षण
मुक्तं शालिन्युक्ता म्तौ तगौ गाधिकैर्लो १८

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

७ स्तु० दोधकलक्षणमाह व्याख्या एतत्किं हे अग्रहीतनितंबे यत्र दोधके आद्यचतुष्पं गुरुः स्यात् इ-
ति अग्रहीतौ स्थूलौ नितंबौ यस्याः सा अग्रहीतनितंबा तस्याः संबोधनं हे अग्रहीतनितंबे प्रकटं

आद्यचतुष्पम हीननितंबे सप्तमकं दशमं च तथांत्यं यत्र
गुरु प्रकटस्मरसारे तत्कथितं ननु दोधकमेतत् १८॥

यथा स्यात्तथा स्मर एव कामः एव कामः एव सारो बलं यस्याः सा प्रकटस्मरसारा तस्याः संबोधनं हे
प्रकटस्मरसारे तथा दोधकलक्षणं वृत्तरत्नाकरे ग्रंथे दोधकवृत्तमिदं भ
भभाद्गौ SIISIISII SSoSIISIISIISSoSIISIISIISSoSIISIISIISSo १८

अनेन कामकिशोरकटेक्कातं ध्वनितम
कामिमनोज्ञो सामंधि चध्वनितम् २

७

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

इंद्रवज्रालक्षणमाह । व्याख्या । हे गत्याविलज्जीकृतहंसकांते हे गमनेन निराकृतहंसिके कवींद्र
ताः इंद्रवज्रां ब्रुवते भाषंते तां कामित्याशंक्याह । हे सुजंघे यस्याः त्रिषट्सप्तममक्षरं ह्रस्वं लघु
स्यात् तृतीयं लघु स्यात् षष्ठं लघु स्यात् सप्तमं लघु स्यात् इत्यर्थः यस्याः तद्वत् पूर्वोक्तवत्

यस्यास्त्रिषट्सप्तममक्षरं स्यात् ह्रस्वं सुजंघे नवमं च तद्वत्
गत्याविलज्जीकृतहंसकांते तामिंद्रवज्रां ब्रुवते कवींद्राः ॥ १५ ॥

नवमं ह्रस्वं स्यात् तामिति संबंधः सुशोभने जंघे यस्याः सा सुजंघा तस्याः संबोधने हे सु
जंघे गत्या गमनेन विलज्जीकृता हंसकांता हंसी यया सा विलज्जीकृतहंसकांता तस्याः संबोध
ने हे गत्या कवीनामिंद्राः कवींद्राः श्रेष्ठकवय इत्यर्थः यदाह केदारमिश्राः इंद्रवज्रा

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

८ श्रु०

उपेंद्रवज्रालं० व्याख्या हे अमंद माद्यन्मदने तदानीं तस्मिन्समये कवींद्रैः उपेंद्रवज्रा क-
थिता तदानीं कदा तत्त्वाह हे सुवर्णे यदि इंद्रवज्राचरणेषु पूर्ववर्णा आद्या वर्णा
लघवो ह्रस्वा भवंति इंद्रवज्रायाल्लक्षणेन युक्तानामाद्यवर्णो ह्रस्वश्चेदयमेव विशेषः श्लोके

यदींद्रवज्राचरणेषु पूर्वे भवंति वर्णा लघवः सुवर्णे अमंद
माद्यन्मदने तदानीमुपेंद्रवज्रा कथिता कवींद्रैः ॥ २० ॥ छ छ

द्वबहुलं माद्यन् हर्षं कुर्वन् मदनो कामो यस्याः सा अमंद माद्यन्मदना तस्याः संबोधनं हे अ-
मंद० सुष्ठु शोभनो वर्णो यस्याः संबोधनं हे सुवर्णे यदा कुः उपेंद्रवज्रालक्षणं उपेंद्रवज्रा जत
जास्ततो गौ ISISSIISISS० ISISSIISISS० ISISSIISISS०॥ SISSISISS०॥ २०॥ छ ॥

८

उपजातिलक्षणमाह ॥ था ॥ हे चंद्रकांते सा उपजातिरिति प्रयुज्यतां कथं अनंतरोदितलक्ष्मभाजौ पुरातनै ॥ विद्वद्भिः पंडितैः
परिकीर्तिता सा कारणात् प्रकाराह हे सीमंतिनि यस्याः छंदेन्द्रवज्रौपेंद्रवज्रयोः अनयोः इंद्रवज्रोपेंद्रवज्रयो
रपि पादा पर्यायक्रमेण भवंति तत्प्रकारः पाद १२ वर्णाः प्रथमपादे इंद्रवज्रालक्षणं SS।SS।।S।SS द्वितीयपादे उ
पेंद्रवज्रालक्षणं ।S।SS।।S।SS तृतीयपादे इंद्रवज्रालक्षणं SS।SS।।S।SS चतुर्थपादे उपेंद्रवज्रालक्षणं ।S।

यत्र द्वयोरप्यनयोस्तु पादा भवंति सीमंतिनि चंद्रकांते विद्वद्भिराद्यैः
परिकीर्तिता सा प्रयुज्यतामित्युपजातिरेषा ॥२१॥ = ॥ ॐ ॐ ॐ ॐ

SS।।S।SS सीमंते विद्यते यस्याः सा सीमंतिनी तस्याः संबोधने हे सीमंतिनि चंद्रवत् कांतिः यस्याः सा
चं अथवा चंद्रवत् कांता कमनीया तस्याः संबोधने हे चंद्रकांते अन्यासु मिश्रितासु जातिषु उपजाति
रेव प्रोच्यते पद्य इंद्रवज्राद्याः अनंतरोदितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः इत्थं किला
न्यास्वपि मिश्रितासु स्मरंति जातिष्विदमेव नाम २१

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

८ श्लो॰ व्याख्या हे प्रकटीकृतार्थे मनीषिणा विदुषा सा विदुषा सा विपरीतपूर्वो आख्यानकी उक्ता विपरीतः।
ख्यानकी भवतीत्यर्थः साकायदि पुरआद्यः इंद्रवज्राचरणस्यात् अमेवयः द्वितीयतृतीयचतु
र्थो उपेंद्रवज्राचरणभवंतिसेतिसंबंधः

आख्यानकी सा प्रकटीकृतार्थे यदींद्रवज्राचरणः पुरस्यात्
उपेंद्रवज्राचरणास्त्रयोन्येमनीषिणोक्ताविपरीतपूर्वी २२॥

प्रकटीकृतः अर्थोकामलत्वेनयस्याः साप्रकटीकृतार्थातस्याः संबोधनं हे प्रकटीकृतार्थे
यद्वा विपरीतेति आख्यानस्यएकौ विशेषणं प्रकटीकृतः अर्थोयस्यां साप्रकटीकृतार्था मनीषा
बुद्धिर्विद्यते यस्य सतेन २२॥

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

रुपोधनतालमुत्तमाह व्याख्या कवयः तां रुपोधनां वदंति कथयंति [illegible]तां कां उत्तमाह हे इंदुमु
खि पद त्रयसंपादकं दोधकं तो ज्ञा द्य त्र्यदरं दीर्घं ज्ञायते अतः ज्ञा द्यात्सरं तृतीयं दीर्घं ज्ञायते द्वि
तीपाद पूरणे सप्तमं दीर्घं ज्ञायते तपाउंत्तिकं एकादश

आयम तु रमतरितृतीयकं सप्तमं अष्टनवमंतपान्तिकं दी
र्घमिंदुमुखि पद्य ज्ञायते तां वदंति कवयो रुपोधनां २३॥

मं दीर्घं ज्ञायते इंदुवत् सुंदरं वयस्याः सा इंदुमुखि तस्याः संबोधनं हे इंदुमुखि उक्तवृत्त
रत्नाकरे रोनराविह रुपोधनालगौ ऽ।ऽ।।।ऽ।ऽ।ऽ ०ऽ।ऽ।।।ऽ।ऽ।ऽ ०ऽ।ऽ।।।ऽ।ऽ।ऽ ०ऽ।ऽ।ऽ।।।ऽ ०॥ २३

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

१० वृ० स्वागतालक्षणमाह व्याख्या हे मृगेक्षणि सैव रथोद्धतैव कविभिः स्वागतावृत्तं कथिता कथंभूतैः
कविभिः प्राज्ञैः पुरातनैः श्लोकार्द्धत्यागे क्वाह हे विनीते नम्रीभूते यदि यत्र नवमं अक्षरं व्यत्य
यात् विपरीतात् दीर्घं भवति द्वौ चकारौ विपरीता

अक्षरं च नवमं दशमं च व्यत्ययाद्भवति यत्र विनीते प्रा
ज्ञैर्यदि मृगेक्षणि सैव स्वागतेति कविभिः कथिता सा २४

यत्र चक्रे मृगाक्षि रोहणौ द्रव इक्षणौ यस्याः सा मृगेक्षणी तस्याः संबोधने हे मृगेक्षणि उक्तं
च स्वागतेति रनभाद्गुरुयुग्मं SISIIISIISSo SISIIISIISSo SISIIISIISS oS ISIISSo २४:६:

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

द्वादशाक्षरजातौ तोटकलक्षणमाह व्याख्या हे घनपीनपयोधरभारनते ननु निश्चितं द्वा
दंतोटकवृत्तं प्रथितं विस्तारितं इदं किं? सा ह हेऽनंतरते चेत् यदि सतृतीयकषष्ठनव
मं गुरु स्यात् तृतीयं गुरु स्यात् षष्ठं गुरु स्यात् अपि विरतौ च भवं गुरुः स द्वादशमं गुरु स्यादि
त्यर्थः तृतीयकषष्ठाभ्यां सह वर्तमानं सतृतीयकषष्ठं अनंतरं

सतृतीयकषष्ठमनंतरते नवमं विरतौ च भवं गुरु चेत् घ
नपीनपयोधरभारनते ननु तोटकवृत्तमिदं प्रथितं २५ ॥

अपरिमिता रतिर्यस्याः साऽनंतरता तस्याः संबोधने हेऽनंतरते घनं पीनौ कठिनस्थूलौ पयो
धरौ तयोः भारः तेन नता यातत्संबोधने हे घनपीनपयोधरभारनते नगणा चात्र तोटकवृत्ते रताः
रेसैसाः सः इह तोटके मनुधिभिः प्रथितं ।।ऽ।।ऽ।।ऽ।।ऽ०।।ऽ।।ऽ।।ऽ।।ऽ०।।ऽ।।ऽ।।ऽ।।ऽ०।।ऽ।।ऽ।।

।।ऽ।।ऽ।।ऽ।।ऽ

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

११ श्रीः

वैश्वदेव्यालक्ष्माह ॥ व्याख्यानं च तस्मिन्न् छंदोशास्त्रकविभिः नाम्नाख्याता सा वैश्वदेवी नि
र्दिष्टा कथिता सा का उत्ताशंकयाह ॥ हे बाले नवीनयौवन धीरयत्र ह्रस्वौ वर्णौ सप्तमं स्यात् हे बिंबो
ष्ठि तद्वत् पूर्वोक्तलक्षणवत् एकादशाद्यः दशमः ह्रस्ववर्णौ न्यस्तौ चेद्धवौ पंचभिः तुरंगैः

ह्रस्वौ वर्णौ स्यातां सप्तमो यत्र बाले तद्वद्बिंबोष्ठि ह्रस्वमेकादशाद्यः
वाणैर्विश्रामो यत्र चेद्वा तुरंगै नाम्ना निर्दिष्टा तत्र सा वैश्वदेवी २६

सप्तमश्च विश्रामः स्यात् सेति संबंधः पत्ते दानित्यसंबंधः हे बिंबवदुष्ठे ओष्ठे यस्याः सा बिंबोष्ठी
तस्याः संबोधनं हे बिंबोष्ठि एकादशानां आद्यः पूर्वः एकादशाद्यः दशमः ह्रस्वः तत्सर्पिः यदाहुः
केदारभट्टाः पंचाश्वैश्छिन्ना वैश्वदेवी ममौ यौ SSSSSSISSISS०ISSSSSISSISS०ISSSS

३६।०SSISSISSSSSS।०SSISSISSISS

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

भुजंगप्रयातलक्षणमाह व्याख्या हे शारच्चंद्रविंबद्विषिवक्त्रारविंदे कवींद्रैः तदुक्तं द्रः भुजंगप्रयातं
उक्तं कथितं तत् किं चेत् यदि यथा अत्राद्यं प्रथमं ह्रस्वं लघु स्यात् तथा चतुर्थं ह्रस्वं स्यात् तथा प
वनिमित्रं तत एकादशाद्यं दशमं अष्टदरं ह्रस्वं स्यात् तदितिसंबंधः एकादशानां अत्राद्यं प्रथमं स्यात्‌र्थः

यदाद्यं चतुर्थं तथा सप्तमं चेत् तथैवाक्षरं ह्रस्वमेकादशाद्यं । श-
रच्चंद्रविंबद्विषिवक्त्रारविंदे तदुक्तं कवींद्रैर्भुजंगप्रयातं ॥ २७ ॥

शारदेरे चंद्रस्यारविंदत्वात् विंबद्विषिवक्त्रमेव वक्त्रारविंदं यस्याः सा शारच्चंद्रविंबद्विषिवक्त्रारविंदा
तस्याः संबोधने हे शारच्चंद्रविंबद्विषिवक्त्रारविंदे गणांतरेणाप्युक्तं भुजंगप्रयातं भुजंगा वेदैश्चतुर्भिः
ISSISSISSISSoISSISSISSISSoISSISSISSISSoISSISSISSISSo॥ २७ ॥

१२ श्रु०

व्याख्या अपि इति कोमलालापे विचक्षणैः पण्डितैः द्रुतविलंबितं इति नाम उपदिश्यते उ
तौ नि किं इत्याह हे कृशोदरि यत्र चतुर्थकं गुरु स्यात् चेति अतः परं सप्तमकं गुरु स्यात् तथा

अपि कृशोदरि यत्र चतुर्थकं गुरु च सप्तमकं दशमं तथा वि
रतिगं च तथैव विचक्षणैः द्रुतविलंबितमित्युपदिश्यते २८

दशमं गुरु स्यात् च अतः परं तथैव विरतिगं अंत्यं द्वादशमं गुरु स्यात् इत्यर्थः इति उपदिश्य
ते कृशमुदरं यस्याः सा कृशोदरी तस्याः संबोधने हे कृशोदरि उक्तं च द्रुतविलंबितमाहुर्नभौ
भरौ ॥ ।।। ऽ।।ऽ।।ऽ।। ऽऽ।।ऽ।। ऽ।।ऽ।।ऽ।।ऽ।।ऽ।।ऽ।। प्रमिताक्षरा लक्षणमाह ।ऽ।ऽ॥

२८ ॥ ऽ।ऽ।ऽ।ऽ।ऽ।ऽ

१२

मारव्यो हे अवले कविभिः प्रमिताक्षरा इति कथिता इतीति किं हे विलासिनी यदि तोटकस्य उ
तो लक्षणस्य पंचमकं अक्षरं गुरु दीर्घं विहितं कथितं अपचेत्र यदि तस्य तोटकस्य रससंख्यके
अक्षरं गुरु न भवति तोटक निपतल्लक्षणे पंचमम् अक्षरं ह्रस्वं भवति अंत्यं अक्षरं दीर्घं भवति अ

यदि तोटकस्य गुरु पंचमकं विहितं विलासिनि तदक्षरके रस
संख्यके गुरु न चेद् अवले प्रमिताक्षरेति कविभिः कथिता २९

स्यां प्रमिताक्षरायां निपतल्लक्षणं पंचमं लघु स्यात् अपं च प्रमिताक्षरा तोटकवृत्तमेव अन्येन न
विशेषेण न नामांतरं प्राप्ता विलासो विभ्रमो विद्यते यस्याः सा विलासिनी तस्याः संबोधने हे वि
लासिनी अस्याः लक्षणं केदारे प्रमिताक्षरा सजससैः उदिता ।।ऽ।ऽ।।ऽ।।ऽ।।ऽ।।ऽ।।ऽ२।।

३२ ऽ।।ऽ।।ऽ।।ऽ।।३ ऽ।।ऽ।।ऽ।।ऽ

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

वृ०
१३ हरिणप्लुतावृणमाह हे कमलैदृशोतदासुकविभिः इयं हरिणप्लुता कथिता अथंकाव्य
पीतिकोमलालापे चेत् यदि द्रुतविलंबितकस्य छंदसः आद्यतृतीयायाः प्रथमतृती
ययोस्वरणोः प्रथमात्परं नं भवति त द्रुतविलंबितकस्य आद्ये स्वरणाः एकादशात्परः स्या

प्रथमात्परमाद्यतृतीययोर्द्रुतविलंबितकस्य च पादयोः अपि
चेन्न तदा कमलेक्षणे सुकविभिः कथिता हरिणीप्लुता ३०॥

त तदियं हरिणीप्लुता स्यात आद्यस्य तृतीयस्य स्तौ तनयो एव द्वितीयस्य स्तौ तनयो एव चतुर्थी
ययोः कमलवत् ईक्षणे नेत्रे यस्याः सा कमलेक्षणा तस्याः संबोधने हे कमलेक्षणे सुशोभना
तेस्तबकवपस्यतेः सुकवयः तथा चोक्तं वृत्तरत्नाकरे रसयुगात्लघवो विषमे गुरुर्युजि नभौ

१३

वंशस्थलक्षणमाह व्याख्या हे मदोल्लसद्भ्रूजितकामकार्मुके तदा बुधाः इदं वंशस्थं वदंति तत्तदा कदा इत्याह
चेद्यदि उपेंद्रवज्रायाश्चरणेषु पादेषु यदि उपांत्यवर्णाः अंत्यस्य समीपस्था वर्णाः एकादशमा लघवः कृताः संति भ
वंति अंत्यस्य समीपस्थाः अंत्यसमीपस्थिता अंत्यस्य उपसमीपे उपांत्याः उपांत्या एव वर्णाः मदेन उल्लसंती उल्लासं श्रा

उपेंद्रवज्राचरणेषु संति चेदुपांत्यवर्णा लघवः कृता यदि
मदोल्लसद्भ्रूजितकामुकार्मुके वदंति वंशस्थमिदं तदा बुधाः ॥ ३१ ॥

भ्रुवं तीया भ्रूलता मदोल्लसद्भ्रू वा जितं कामस्य कार्मुकं धनुर्यया सा तस्याः संबोधनं हे मदोल्लसद्भ्रू वं
शस्थलक्षणं केदारोपाह जातौ तु वंशस्थमुदीरितं जरौ ३१ ।ऽ।ऽऽ।।ऽ।ऽ।ऽ १ ।ऽ।ऽऽ।।ऽ।ऽ।ऽ २ ।
।ऽ।।ऽऽ।।ऽ।ऽ।ऽ ३ ऽ।ऽऽ।।ऽ।।ऽ।ऽ।ऽ ४ ।।ऽ।। ७ ज । त । ज । र ।

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

प्रु० १४ इंद्रवंशा लक्षणमाह आख्या हेलारूपहेला रतिरंगलालसे क्वचयः तां इंद्रवंशां प्रवदंते तां कांइत्याह हे
अंशोकांकुरपाणिपल्लवे यस्यां वं पाश्चस्य पादाग्गुरुः पूर्व वर्णका भवंति गुरुः पूर्व वर्णः अग्रा
दिवर्णा येषांते पुनर्वान्ते गुरुः पूर्व वर्णकाः अशोकस्य अशोक वृक्षस्यांकुरवत् पाणीएव पल्ल

वस्या अशोकांकुरपाणिपल्लवे वंशास्य पादाग्गुरुः पूर्व वर्णकाः ता
रूपहेलारतिरंगलालसे तामिंद्रवंशाकवयः प्रवदंते २२॥

वो यस्याः साअशोकांकुरपाणिपल्लवा तत्संबोधने हे अशोकांकुरपाणिपल्लवे आ ता रूप यौवनस्य हेला क्रीडा तस्याः रतितस्याता रू
प हेला रतेः रंगेलालस यस्याः सा ता रूपहेलारति रंगे लालसा तस्याः संबोधने हे तारूप
उक्तं च स्यादिंद्रवंशा ततजैरसंयुतैः ISIISIIISSSIIOSSISSIISSISSISSIISSSIISISO॥ ३२॥

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

त्रयोरष्टादश जातौ अभावस्माल्लघ्वगमाह यांख्योर्हेत्रमन्तलते हि निश्चितं सा प्रभावतीलहतता साका
रत्वात्पंकाह हे प्रिये यस्याः प्रथमे अष्टादशं ष पंचमं द्वयं गुरु भवति तुर्यं गुरु स्यात् तथा नवमं गुरु
स्यात् दशांतिकं गुरु स्यात् कपंभन्ते दशांतिकं सात्यं अंत्ये नसरवर्तमाने सात्यं त्रयोदशमगु

यस्याः प्रिये प्रथममष्टमदशद्वयं तुर्यं तथा गुरु नवमं दशांतिकं सा
त्यं भवेद्यदि विरतिर्युग ४ ग्रहैः सालहिता सा मन्तलते प्रभाव

रु स्यादित्यर्थः यदि युयुग ४ ग्रहै ९ विरतिर्भवेत् चतुर्भिश्च पतिः स्यादित्यर्थः युगाश्च
ग्रहाश्च युगग्रहाः तैश्च मन्तसलते वलतायाः साश्च मन्तल्लतानतत्वं बोधने हेश्च मन्तल्लते ३२

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

१५ वृ०

प्रहर्षिणीपालक्षणमाह व्याख्या हे सुदति ननु निश्चितं सा प्रहर्षिणी विज्ञेया ज्ञातव्या सा का यस्याः हे सुभा
षिते त्वेते यदि आद्यं प्रथमं स्थितं पञ्चतेरं त्र्यं गुरु स्यात् आद्यानि त्रीण्यक्षराणि गुरूणि भवंतीत्यर्थः
अपगतेतः अष्टमं नवांत्यं दशमं गुरु स्यात् चशब्दात् परं उपांत्यं द्वादशं गुरु स्यात् त्रयोदशमं गुरु स्यादित्यर्थः

आद्यं चेत् त्रितयमथाष्टमं नवांत्यं चोपांत्यं गुरु विरतौ सुभाषिते स्यात्
विश्रामो भवति महेशनेत्रदिग्भिर्विज्ञेया ननु सुदति प्रहर्षिणी सा ॥ १४

पञ्चमहेशनेत्रदिग्भिर्विश्रामो स्यात् त्रिभिर्दशभिश्च विरतिर्भवेदित्यर्थः सुशोभना भाषा यस्याः सा सुभाषिता
तस्याः संबोधनं हे सुभाषिते महेशनेत्राणि च दिशश्च ताभिः महेशनेत्रदिग्भिः त्रिभिर्दशभिरित्यर्थः सुशोभना
दंता यस्याः सा सुदती हे सुदति उक्तं च म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयं चातुर्दशजातौ वसंततिलका ल

वसंततिलका ऽऽ।ऽ।।।ऽ।।ऽ।ऽऽ १४

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

व्यारव्या हे कांते किलेति निश्चितं कवयः तां वसंततिलकां वदंति कथयंति तां कामिन्या हे कामांकुशांकुशांतको
मिमतं राजेंद्र चेत् यदि आद्यद्वितीयपि आद्यं अक्षरं द्वयं पि गुरुस्यात् तस्मात्परं चतुर्थं गुरुस्यात् चग्र
स्मात्परं दशमांतस्यएकादशमं गुरुस्यात् आत्याश्चयोदशमं गुरुस्यात् अंत्यं भवेत् अंदरं गुरुस्यात् चतुर्दशम
मित्यर्थः दशमस्यअंत्यदशमांत्यएकादशांत गुरुस्यादित्यर्थः अत्रसमउपउपांत्यश्चयोदशमं मित्यर्थः अंत्ये भव

आद्यद्वितीयमपि चेद्गुरु तच्चतुर्थं यात्राष्टमं च दशमांत्यमुपांत्यमंत्यं
कामांकुशांकुशितकाममतंगजेंद्रे कांते वसंततिलकां किल तां वदंति

मंत्यामित्यर्थः काम एव अंकुशस्तेन अंकुशिताः कामिनाा एवमतंगजेंद्राः यया सा कामांकुशांकुशितकामि
मतंगजेंद्रा तत्संबोधने हे कामांकुशासिनि उक्तंच उक्ता वसंततिलका तभजाजगौगग गौगः सि
हेन्नेतेयमुदिता गुणिकाश्यपेनन नागेन सैत्वगदिता मधुमाधवीति ३५

१६ वृ०

पंचदशाक्षजातौ मालिन्या लक्षणमाह व्याख्या हे कांते सा मालिनी प्रसिद्धा विख्याता कथंभूता नामा० सु
कविजनमनोज्ञा सुशोभना कविजनाः तेषां मनोज्ञा साकारयुतत्वात् हे कांते यत्र प्रथमं षष्ठं षष्ठपर्यंतं अगुरुलघु विद्य
ते अत्र यानि षडक्षराणि लघूनि भवंति इत्यर्थः तदनु षष्ठाक्षरादग्रे च इति पादपूर्णे दशमं गुरु स्यात् हे

प्रथममगुरुषट्कं विद्यते यत्र कांते तदनु च दशमं चेदक्षरं द्वादशं तत्
गिरिभिरथ तुरंगैर्यत्र कांते विरामः सुकविजनमनोज्ञा मालिनी
सा प्रसिद्धा ३६

यदि द्वादशं तत्र त्रयोदशमं चेदक्षरं अगुरुलघु स्यात् हे कांते यत्र गिरिभिः अष्टाभिः अथ तुरंगैः सप्तभिः वि
श्रामः स्यादिति संबंधः उक्तं च ननमयययुतेयं मालिनी भोगिलोकैः सप्तदशाजातौ हरिण्या लक्षणमाह हे स
गुरवि लघवः पंच स्युः ततो दशमं तिके तदनु ललिताला पवर्णौ यदि त्रिचतुर्दशौ भवति च पुनर्यत्रोपांत्याः
धृ० स्फुरत्तकरकंकणोपतिरपि रसैर्वेदैः ४ रश्वैः स्यजा हरिणीति सा ३६

१६

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

कारणा हे स्फुरत्करकंकणेत्सादहरिणीत्युतिसमता इति किं हे सुमुखि पंचप्राच्याद्वर्णास्त्लघवः भवंति अग्राद्याः पंचवर्णा ह्र
स्वा भवंति यत्र्यंषः ततः तेभ्यः परः दशमांतिकं एकादशः ह्रस्वो भवेत् हे ललनालापे तदनु एकादशाद्ग्रे त्रिचतुर्दशो वर्णो
यदि ह्रस्वो स्यातां च इति पादपूरणे पुनः भवः पंचउपांत्यः षोडशोपि ह्रस्वो भवति रसैः षड्भिः वेदैः स्वरतुर्भिः ऋषिभिः सप्त

सुमुखि लघवः पंचप्राच्यास्ततो दशमांतकस्तदनु ललिता लापे वर्णौ यदि त्रिचतु
र्दशौ भवति च पुनर्यत्रोपांत्यः स्फुरत करकंकणे यतिरपि रसैर्वेदैः स्वैः स्मृता ह
रिणीति सा ३७

भिर्यतिर्विरामः स्यात्सेतिसंबंध सुश्रोमनं मुखं यस्याः सा सुमुखी तस्याः संबोधने हे सुमुखि ललितो मनोह
रः लापो भाषणं यस्याः सा ललितालापा तस्याः संबोधने हे ललितालापे त्रयोदशश्च चतुर्दशश्च त्रिचतुर्दशौ
स्फुरति करे कंकणानि यस्याः संबोधने हे स्फुरत्करकंकणे उक्तं द्वियुगर सहयैन्सौम्रो म्लौगो यदा हरिणी
तदा ३७ ॥ ॐ

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

१८ स्त्रि

शिखरिणी लक्षणमाह व्याख्या हे जघनाभोगसुभगे सा शिखरिणी नाम छंदो भवति सा का यस्यां हे कलितकमलेप
दपूर्वः ह्रस्वः लघुः स्यात् हे प्रफुल्लितसुकुमारे ततः पूर्वात् अग्रे षष्ठकपरः षष्ठवर्णादग्रे पंचवर्णा द्रुत्वा विरचिता
भवंति किंभूते भवति तत्र आद्यमनंतरं दशमैकादशमा इति पंचवर्णा लघवो भवंतीत्यर्थः हे सुतनु चरतिते प्रथमः पु
रुषे त्रयः उपांत्यावर्णा लघवो भवंति चतुर्दशपंचदशषोडशा इति त्रयः लघवो भवंतीत्यर्थः यस्याः रसैः ष
ड्भिः रुद्रैरेकादशभिर्विरतिः स्यात् सेति संबंधः कलितकमले दूरं कमला यस्याः सा कलितकमला तस्याः संबोध

यदाद्यस्त्वाः पूर्वः कलितकमले षष्ठकपर स्ततो वर्णाः पंच प्रफुल्लितसुकुमारे विर
चिताः त्रयोऽन्ये चोपांत्याः सुतनु जघनाभोगसुभगे रसैः रुद्रैर्यस्यां भवति विर
तिः सा शिखरिणी ३८

ने हे कलितकमले षष्ठकात् प्रफुल्लसात्त्वभावेन शोभमाना कुमारावालसा प्रफुल्लितसुकुमारा तस्याः संबोधने हे सुशो
भनाते नु यस्याः सा सुतनुः तस्याः संबोधने हे सुतनु जघनस्य शुभ्राभोगः घजनाभोगः तेन जघनाभोगेन सुभगा
सुभगा तस्याः संबोधने हे० सेति संबंधः उक्तो हि रसैः रुद्रैः छिन्नाय मनन सभलागः शिखरिणी ३८ ।ऽऽऽ
ऽऽ।।।।।ऽऽ।।ऽ०।ऽऽऽऽऽ।।।।।ऽऽ।।।ऽ०।ऽऽऽऽऽ।।।।।ऽऽ।।ऽ०।ऽऽऽऽऽ।।।।।ऽऽ।।ऽ०।ऽऽऽऽऽ।।।ऽऽ।।ऽ०।।

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

त्पथ्वीलततमाद्‌ हे सभ्रु हिनिम्नितेसाप्थ्वीनामदंदेभवेत तिसाकामुत्याद्यां यमाद्‌हे गर्ल्लिकुंतलेयदि द्वितीयसंख्योद्गुरु
स्यात षष्ठंगुरुस्यात अष्टमं गुरुस्यात द्वादशं गुरुस्यात अथ अतः परं चतुर्दशंगुरुस्यात हे गंभीरनाभि हृद
तदनुतस्मात चतुर्दशात्परः दीर्घः पंचदशमांतिको भवति पंचदशमः गुरुस्यात सप्तदशमश्च पर्य इति हे को
ते हे सुदरि यत्र गिरीन्द्र कण्णाभ्न तकुलेयति विरामः स्यात सेति संबोधः अलि भ्रमरवत्‌ श्यामाः कुंतला यत्र

द्वितीयमल्लिकुंतलेस्याद्यखडेक्षमं द्वादशं चतुर्दशमथ्यापि प्रियेगुरुगंभीरनाभिहृदे ॥
संपंचदशमंमातिकवत्सदनुयत्रकांतेपातिगिरीन्द्रकण्णाभ्नतकुलेभवतिसुभ्रुपथ्वीहिसा

लिकायस्याःसाअलिकुंतलातस्याःसंबोधनं हे अलिकुंतले षट्‌ च अष्टमं च षडष्टमं गंभीरानिम्नानाभिए
व हृदोयस्याःसागंभीरनाभिहृदातस्याःसंबोधने च हे गंभीरनाभिहृदे पंचदशमश्चअंतिकस्य पंचदशमा
तिकः पंचदशमः १५ सप्तदशमः १७ इत्यर्थः गिरीन्द्रास्य कण्णाभ्न तकुलानि च गिरीन्द्र कण्णाभ्नकुलानितैः ७१४
नवभिश्छिन्न पथ्वीः उक्तंच जसौजसयलावसुग्रहयति च पथ्वी गुरुः ॥ ISIIISISIISISSISOISIIISISIIISISS

॥ISISIIISISIIISISIIISISIISISISOISISISIISISIISISIISISIISISIIISISOIS

एकोनविंशतिजातौ शार्दूलविक्रीडितलक्षणमाह व्याख्या हे पूर्णेन्दुबिंबानने काव्यरसिकाः तद्वृत्तं शार्दूलविक्रीडितं प्रव
श्रु॰ १८ दन्ति हे प्रियतमे चेत् यदि आद्यास्त्रयो वर्णा गुरवः सन्ति तथा षष्ठो गुरुः स्यात् चकारात् अष्टमः गुरुः स्यात् चेत् य
दि एकादशाद्यात् इति हे प्रियतमे अनुक्तत्वान्न प्रिये एकोनविंशत्यक्षराय जातौ चेत् यदि पूर्वे त्रयो वर्णा ततः ष
ष्ठः तदनु अष्टमः ततः एकादशात् अग्रे त्रयो वर्णाः द्वादश त्रयोदश चतुर्दशाः गुरवः स्युः तदनु पञ्चदशात् दशादश

आद्यास्त्रयो गुरवः प्रियतमे षष्ठस्तथा चाष्टमः सन्त्येकादशतस्त्रयस्तदनु चेत् षोडशा
द्यौ ततः मार्तण्डैः मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिंबानने तद्वृत्तं प्रवदन्ति काव्यरसिकाः शा
र्दूलविक्रीडितं ॥ ७० ॥

द्वादशौ षोडशसप्तदशवर्णौ गुरू भवतः तथा शेषोऽपि गुरुरेव शेषा लघवः स्युः पुनर्यत्र मार्तण्डैः द्वादशभिः ततः एका
नविंशैर्मुनिभिः सप्तभिरक्षरैः द्वितीयायां यतिः स्यात् हे पूर्णेन्दुबिंबानने पूर्णिमायाः इन्दुस्तस्य बिंबमण्डलं तद्वदा
ननं यस्याः सा तत्संबुद्धौ हे काव्यरसिकाः काव्यरसज्ञा जनाः तत् शार्दूलविक्रीडितं नाम छन्दः प्रवदन्ति कथयन्ति ॥ ७० ॥
इति शार्दूलविक्रीडितं नाम छन्दः ॥ ॥ छ ॥

१८

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

श्रु० १९

चत्वार इति हे मृगमदमुदिते पृथ्विं विंशत्या स्वदशकैः राणां ज्ञातो यत्र प्रथममादौ चत्वारो वर्णाः लघवः षष्ठः सप्तमः तदग्रे तावत् षोड
शाद्यौ चतुर्दश पंचदशौ वर्णौ तदग्रे षोडशाद्दशौ द्वौ सप्तदश अष्टादशौ तदग्रे पादस्यान्ते वर्णमानौ विंशतिः एकविंशतितमौ द्वे व
र्णौ एते गुरवः स्युः शेषा लघवः स्युः हे रंभास्तंभोरु कांते रंभायाः कदल्याः स्तंभवदूरू यस्याः कांता मनोहरा तत्संबुद्धौ हे ०
चेद्यदि मुनि मुनि मुनिभिः त्रिः सप्तवारं सप्तभिः सप्तभिः रहदैः विरामो विश्रामो भवति हे बाले षोडशाद्धे हे सुतनु सुंदरो

चत्वारो यत्र वर्णाः प्रथममपि लघवः षष्ठकः सप्तमोपि द्वौ तावत् षोडशाद्यौ मृगमदमु
दिते षोडशांत्यौ तथान्त्यौ रंभास्तंभोरु कांते मुनि मुनि मुनिभिः स्पष्टयतिर्यदि स्याद्विरामो बा
लेवं धैः कवीन्द्रैः सुरतिनिगदिता स्रग्धरेयं प्रसिद्धा ४१ इति श्रीपंडितवररघुनाथविरचि
ताः श्रुतबोधाख्यः छंदोग्रंथः समाप्तम ॥ शुभमस्तु

गीकवीन्द्रैः सा स्रग्धरेति निगदिता कथिता बुधैः कवीन्द्रैः श्रेष्ठैः कीदृशी स्रग्धरा प्रसिद्धा लोके विख्याता
इति स्रग्धरा नाम छंदः यद्यपि छंदांसि भूयांसि वर्तंते परमत्र प्रसिद्धान्येव कानि इति उक्तानि चत्वारि च वक्तव्या
करोदि भ्योवसेया ४१ मृभ्रैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयं प्रवक्ष्यतां SSSSISSIIIIIISSISSI
SSoSSSSISSIIIIIISSISSISoSSSSISSIIIIIISSISSISoSSSSISSIIIIIISSISSISSo इति श्रीश्रुतबोधटीका

१९

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative